नं० १०१ ८-घ

~~नं० १०१ ८-घ~~

महावाक्यविवेकः सव्याख्यः (वेदान्तशास्त्रम्)

नं० १०१८-घ

१२ पत्राणि

पत्राणि १२ (सम्पूर्णम्)
कर्ता रामकृष्णः

श्रीगणेशाय नमः ॥ वायुपुराणे ॥ व्यासः ॥ आचार्यस्य प्रियं कुर्यात् प्राणैरपि धनैरपि । कर्म
णा मनसा वाचा स याति परमां गतिं ॥ ९ ॥ आचार्यं मां विजानीयान् नावमन्येत कर्हिचित् ॥ न म
र्त्यबुद्ध्यासूयेत सर्वदेवमयो गुरुः ॥ १० ॥ शिवगीतासु ॥ सर्वकर्माणि संन्यस्य भिक्षाशी निःप
रिग्रहः ॥ भाषेति मम सायुज्यं गुह्यमेतन् मया दितं ॥ ११ ॥ अत्रिः ॥ स्नानं त्रिषवणं प्रोक्तं
नियमास्थूस्त्रिदंडिनां ॥ नैत्यकर महंसानामुक्तो मात्स्यदर्शिनां ॥ ४ ॥ मेधातीथिः ॥ व
र्जनं मधुमांसं च अन्नं किंचादिदूषितं । हन्तकारं च नैवेद्यं प्रत्यक्षं लवणं तथा । एतान्
भुंक्ते याति निर्मोहाम् प्रजापत्यं समाचरेत् ॥ स्नानं त्रिषवणं प्रोक्तं बहूदकवनस्थयोः ॥ हंसे तु स
कृदेकं स्यात् परमहंसे न विद्यते ॥ शंखः ॥ माषमज्जेन मात्र स्तु संग्रह्य त्रिः पिबेदपः ॥
वंस्नाति र्यन्नरदेवतिपित्रेण न कदाचन ॥ ३० ॥ पीत्वा हस्तौ प्रक्षाल्याप्पादौ वाप्यवलोम
को ॥ वारिणां गुरुमुखेन द्विः प्रमृज्य ततो मुखं ॥ २ ॥ तिस्त्रभिर्मेध्य माभिर्वीक्ष वीजि वीरि
णां स्पृशेत् ॥ अंगुष्ठेन प्रदेशिन्या घ्राणं पश्चादनंतरं ॥ २ ॥ अंगुष्ठानामिकाभ्यां चा च

पा३

१ स्तुत्रैश्चैव पुनः पुनः ॥ स [illegible] सन्नयति स्त्रीयतीनां भरितं चयत् ॥ अन्नं तयं न भोक्तव्यं भु

। क्त्वा चांद्रायणं चरेत् ॥ [illegible] निस्तां गुरुतो नाभिहृदयं तु तलेन वै ॥४॥ सव्ये भिक्ष्व शिरः पश्चात्

वा दुचाग्रेण संस्पृशेत् ॥ अपस्पृशेत्तु सर्वत्र पदे मध्ये द्विजातयः ॥५॥ अशक्तश्चिश्च तु वीपि

पीत्वा प्रक्षालयेत् करं ॥ मुखं प्रमृज्य विधिवत् नाभिं चैव तु संस्पृशेत् ॥६॥ यति भिक्षु ब्रह्मचारी

च नाचमस्य मे वारि [illegible] वानप्रस्थो गृहस्थश्च दैवे पित्र्ये च कर्मणि ॥७॥ वसिष्ठः ॥ प्रणवेने

व कुर्याच्च प्राणायामान्त्रिभिर्मुहुः ॥ सर्वेषामपि पापानां संघाते समुपस्थिते ॥ पूरकः पूरणे

वायोः कुंभकः स्थापनं हृदि ॥ बहिर्निःसारणं तस्य रेचकः परिकीर्तितः ॥ [illegible]

हास्त्रे प्रणवं शोधनं हितं तत् ॥ रेचकं वाममार्गेण पूरकं दक्षिणेन तथा ॥ कुंभकं तु तयोर्हीने मध्य

मे हृदि तिष्ठति ॥ निरोधाज्जायते वायुर्वायोरग्निर्हि जायते ॥ ताभ्यामापोभिजायंते तेन तां

तः शुध्यते त्रिभिः ॥ चतुर्विंशतिमात्रं त्रिंशद्वा द्वादशाथवा प्रणवस्य स्मरेत्तथा १

स्प्राणायामो यतो निलः ॥ भिन्नलक्षणप्राणायामविधानं तु यथाधिकारः द्रष्टव्यं ॥ परमहं
सस्य तु प्राणायामः ॥ प्रणव एव स्यान्नान्यः कुतः प्रणवाभ्यासविक्षेपमाने दोषमस्ति न त्रि
यं पातित्यं परं हंसस्य स्वयं यत्नेनार्यं तु महति ॥ तस्य दोषः स्यादिति विशेषः ॥ वेदो हंसस्य मूलं
प्रणवो यस्य सोऽस्ति हंसः ॥ वृक्षमूलियतिः सस्यात्मकं वेदः परिग्रह इति स्मृतेः ॥ बौधाय
नः ॥ वृक्षमूलिको वेदसंन्यासी वेदो वृक्षः प्रणवोऽस्य मूलं प्रणवात्मको वेदः प्रणवध्या
न प्रणवो ब्रह्मभूयाय कल्पत इति होवाच प्रजापतिरिति ॥ वैवस्वतः ॥ पादमाक्रम्य पा
देनडापनेय तु कारयेत् ॥ शिरः प्रहृत्य सवस्त्रेण ध्यानेनैव प्रशस्यते ॥ व्याहरेद्दक्षकर्मे
ण्या वर्णादर्पणदोषदं ॥ शब्दार्थचिंतनाभ्यासात्स उक्तो मानसो जपः ॥ पद्मपुराणः ॥
परमहंसाश्रमिणस्तु प्रणवाभ्यासशीलिनः ॥ यथा यत्नेनुपलब्धविज्ञानो विरक्तः संयतेंद्रियः
॥ यावज्जीवं जपन्नेमं प्रणवं ब्रह्मणो वपुः ॥ उच्चो देहतिपापानि दीर्घो मोक्षप्रदायकः
प्लुतस्तु सर्वसिद्धिः स्यात् प्रणवस्त्रिविधः स्मृतः ॥ अकारो ऋग्वेद उकारो यजुर्वेदः मकारः

२ सामसंस्थितः ॥ काठके ॥ सर्वे वेदा यत्पदमामनंति तपांसि सर्वाणि च यद्वदंति ॥ यदिच्छंतो
ब्रह्मचर्यं चरंति तत्ते पदं संग्रहेण प्रब्रवीम्योमित्येतत् ॥ एतदालंबनं श्रेष्ठमेतदालंबनं परं
२ एतदालंबं ज्ञात्वा ब्रह्मलोके महीयते ॥ यस्तु द्वादशसाहस्रं नित्यं प्रणवमभ्यसेत् ॥ तस्य द्वाद
शभिर्मासैः परं ब्रह्म प्रकाशते ॥ उशनाः ॥ माधूकरमसंक्लृप्तं प्राक्प्रणीतमयाचितं ॥ तात्का
लिकं चोपपन्नं भैक्ष्यं पंचविधं स्मृतं ॥ मनःसंकल्परहितां गृहान्स्त्रीन्पंच सप्त वा ॥ मधुव
दाहरणं यत्तन्माधूकरमिति स्मृतं ॥ शयनोत्थापनात्प्राक् प्रार्थितं भक्तिसंयुतैः ॥ तत्
प्राक्प्रणीतमित्याह भगवानुशनामुनिः ॥ भिक्षाटनसमुद्योगात्प्रागेवापि निमंत्रितं ॥ अया
चितं तु तद्भैक्ष्यं भोक्तव्यं मनुरब्रवीत् ॥ उपस्थानेन यत्प्रोक्तं भिक्षार्थं ब्राह्मणेन हि ॥ तात्का
लिकमिति ख्यातं तदन्नं वै मुमुक्षुणां ॥ सिद्धमन्नं भक्तजनैः आनीतं यन्मठं प्रति ॥ उपपन्नं त
दित्याहुर्मुनयो मोक्षकांक्षिणः ॥ भिक्षा पंचविधा ह्येताः सोमपानसमाः स्मृताः ॥ तासामे
कतमस्यापि वर्तीयन्सिद्धिमाप्नुयात् ॥ क्रतुः ॥ संप्रार्थितं समुत्थानात् असंक्लृप्तमयाचितं ॥ त २

स्मदेकांतमध्यध्यान् भैक्षं माधूकरावरं ॥ अयाचितं यथालाभं भोजनाच्छादनं भवेत् ॥ निमं
त्रितो वा श्रीयात्स्वगुणं न प्रकाशयेत् ॥ पराशरः यतीनामातुराणां तु वृद्धानां दीर्घरोगि
णां ॥ एकान्नेन न दोषोस्ति एकस्यैव दिने दिने ॥ क्रतुः ॥ सुजीर्णविकशायोगी दर्शतो वि
कलेंद्रियः ॥ पुत्रमित्रगुरुभ्यो वा पत्निनो मेध्यमाहरेत् ॥ एनस्सर्वयतिविषयं ॥ मृदा वी
लो वुडंपात्रं वेणवं तालचोफ्ता ॥ प्राणे नार्णे तथाक्षीमं पात्रं पणपुटं तथा ॥ दक्षे ॥ जीर्णि
तो व्ययमायन्नो याच्नमतिर्यतेस्तत ॥ लिप्यते न स पापेन पद्मपत्रमिवांभसा ॥ नापि मूत्र
पुरीषाभ्यां नाग्निर्दहनकर्मणा ॥ न वायुः स्पर्शदोषेण नान्नदोषेण मस्करी ॥ परमहंस
स्य तु विशेषमाह ॥ पितामहः ॥ अयाचितं समं कुतमुपपन्नं यदृच्छया ॥ जोषयेन्नसदा ना
ड्यं गतास माागतमस्पृहः ॥ सौवर्णलोहरौप्येषु ताम्रत्रापुसमयेषु च ॥ अभ्रनुन्निकृते
दुरस्य न दुष्यन्ते मनिग्रहात् ॥ माधूकरमथैकान्नं परमहंसः समाचरेत् ॥ ॥ याज्ञवल्क्यः
॥ यतिपात्राणि मृद्वेणुदार्वलावुमयानि च ॥ सलिलं शुद्धिरेतेषां गोवालैश्चावघर्षणं ॥ मृ

२ सर्वे दाडिमकपित्थकाः ॥ नयतीनां पात्राणि भवेयुः ॥ तेषां सलिलैः शुद्धिर्यावालावघर्षणौ च शुद्धिः
3 ॥ अत्रिः ॥ पिता माता स्वसा भ्राता स्नुषा जाया सुतस्तथा ॥ ज्ञातिर्बंधुः सुहृद्वर्गो दुहिता नत्वसु
नादयः ॥ यस्मिन् देशे वसेद्यस्तु न तत्र दिवसं वसेत् ॥ दृष्टः शोको भवेत्तत्र रागद्वेषौ द्वयामलाः
॥ अनुपातं यदा कुर्याद्भिक्षुः शोकेन वार्दितः ॥ योजनानां शतं गत्वा तदा पापात्प्रमुच्यते ॥
॥ वासो बंधूनां कलहो भवत्येव ... द्वयोरपि ॥ एक एव चरेत्तस्मात्तस्मात्कुमार्या इव कंकणं ॥
राजवार्ता दिवा तेषां भिक्षावार्ता परस्परं ॥ स्नेहपैशुन्यमात्सर्यं सन्निकर्षात्प्रवर्तते ॥ हारि
तः ॥ अपंडितस्यापि शूद्रस्य शास्त्रज्ञानरतस्य च ॥ वचनेन तस्य न ग्राह्यं शुनोच्छिष्टं हविर्यथा
॥ श्वचर्मणि यथा क्षीरमपेयं ब्रह्मवादिभिः ॥ तथा शूद्रमुखाद्वाक्यं न श्रोतव्यं कदा
चन ॥ वस्त्रं च परिशिष्टं ॥ यो भवेत्पूर्वसन्यासी तुल्यो वै धर्मतो यदि ॥ तस्य प्रणामः कर्त
व्यो नेतराय कदाचन ॥ अत्रिः ॥ पितृमातृक्षयं श्रुत्वा स्नानाच्छुध्यति सांबरः ॥ न कुर्यात्सूत
कं भिक्षुः श्राद्धपिंडोदकक्रिया ॥ वायुपुराणे ॥ दंडं प्रदर्शयेद्भिक्षुर्गयां गत्वा न पिंडदः ॥ दंडं विष्णु २

पदेशास्पृष्ट्वा पितृभिः सह मोदते ॥ गयायां मुंडपृष्ठे च कूपे यूपे वटे तथा ॥ दंडप्रदर्शयेद्दिक्षु पितृभिः सह
मोदते ॥ विष्णुः ॥ संभाषणं सह स्त्रीभिरालापः प्रेक्षणं तथा ॥ नृत्यं गानं सभां सेवेत्तु परिवादांश्च वर्ज
येत् ॥ मेधातिथिः ॥ न संषैभीत्स्त्रियं काचित्पूर्वं दृष्टां न च स्मरेत् ॥ कथां च वर्जयेत्तासां न पश्येत् लिखि
तामपि ॥ एतच्चतुष्टयं मोहात्स्त्रीणामाचरतो यतेः ॥ चित्त श्चतुष्टयं ॥ विक्रियते वश्यं तच्छिद्रकारात्प्रण
श्यति ॥ पुष्पं शाखां पल्लवं वा फलमूलतृणादिकं ॥ छित्वा चयमस्तु संन्यासी नरके पतति ध्रुवं ॥ अत्रिः ॥
श्वकाकगर्दभैरुष्ट्रैर्बुक्कैर्वा नरैस्तथा ॥ चाण्डालपतितैः स्पृष्टं यतिः पात्रं विसर्जयेत् ॥ वायुपुरा
णे ॥ संन्यासी यो हि भूत्वा तु हिरण्यं संग्रहेद्द्विजः ॥ तस्य दर्शनमात्रेण सचेलो जलमाविशेत् ॥ द्रव्यदा
नं यतिर्यो वै करोति च नराधमः ॥ पच्यते नरके घोरे यावदाभूतसंप्लवं ॥ अद्वैतभावमाश्रित्य द्वैताचारे
ण वर्तते ॥ रुदंति पितरस्तस्य हा कष्टं पतितं पुनः ॥ लब्ध्वा द्रव्यं परित्याज्यं उपवासत्रयं चरेत् ॥ प्राणा
यामशतं कृत्वा अयुतं जपमाचरेत् ॥ विष्णुपुराणे ॥ यद्बाल्ये यच्च कौमारे यत्पापं यौवने कृतं ॥ तत्पा
पमखिलं क्षिप्रं स्मृते विष्णौ प्रणश्यति ॥ अभक्ष्यभक्षणात्पापमगम्यागमनाद्द्विज ॥ न नश्यते नात्र
सन्देहो गोविंदस्य तु कीर्तनात् ॥ उक्तं च ॥ प्रायश्चित्तेषु सर्वेषु यतेर्ध्यानं विशिष्यते ॥ प्रणवस्य जपो वा
थ मूलमन्त्रस्य संस्मृतः ॥ प्राधो ... त्वंशश्च यतेर्भ्र स्या प्रणवस्य जपादिषु ॥ तस्मात्सर्वप्रयत्नेन प्रणवैकपरो

४ भवेत्॥ जपाज्ज्ञानात्तपोध्यानान्नान्यद्विक्षोस्तिसाधनं॥ तस्मात्तांतिसदा कुर्याद्यतिः शुध्यर्थमात्मनः॥
५ वायव्ये॥ मद्यमूत्रपुरीषैश्च शुक्रकीलालशोणितैः॥ [redacted] स्पृष्टदेवंत्यजेद्विष्णुः शेषैः संस्कारमर्हति॥
॥ विष्णुपुराणे॥ अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः॥ पुमान्विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरि
व॥ यन्नामकीर्तनं भक्त्या विनाशनमनुत्तमं॥ मैत्रेयाशेषपापानां धातूनामिव पावकः॥ एवं स्तुवन्नरो
राजन्नु सदा नारायणं विभुं॥ यमलोकं न पश्येत्तु नरकं स्तु कुतः पुनः॥ आदित्यपुराणे॥ अन्यत्र
गत्वा॥ अप्येकपत्न्या नाम्न्या यात्स्वयुक्तः स्वजनैरपि॥ कोहि जानाति किं कस्य प्रपंचे न पालकं भवे
त्॥ भस्मस्तंभजलद्वारमार्गे पंक्तिं च भेदयेत्॥ वने स्थितं तिष्ठति दैवरक्षितं गृहे स्थितं दैवहतं
विनश्यति॥ जीवत्यनाथोपि वने विसर्जितः कृतप्रयत्नोपि गृहे न जीवति॥ लिखिता चित्रगुप्तेन ललाटा
टेक्षरमालिका॥ न समार्जितयितुं शक्या पिंडैतैस्त्रिदशैरपि॥ नाहं चिंतये त्वा तात धर्ममेकं तु चिंत
येत्॥ आहारो हि मनुष्याणां जन्मना सह जायते॥ यो वै गर्भगतस्यापि वृत्तिं कल्पितवान्प्रभुः॥ शे
षा वृत्तिविधानाय स किं सुप्तोथवा मृतः॥ येनैव यद्यथापूर्वं कृतं कर्म शुभाशुभं॥ स एव तत्तथा भुंक्ते
दुःखं वा यदि सुखं वा यस्य यस्य यथा कर्म तस्य तस्य तथा मतिः॥ पुण्यपापाश्रिता भावा जायते प्राणिनां
प्रिये॥ अहिंसकाः शांतपरायणाः शुभे सुखेषु दुःखेषु समानबुद्धयः॥ ऋजुस्वभावा विषयेषु निस्पृहा

स्मरंति संसारसमुद्रमश्रमं ॥ निःसंगता मुक्तिपदं यतीनां संगाद् अशेषाः प्रभवंति दोषाः ॥ आरूढयोगोपि नि
पात्यतेधः संगेन योगी किमुताल्पसिद्धिः ॥ घोरे कलियुगे प्राप्ते सर्वधर्मविवर्जिते ॥ वासुदेवपरा ज्ञेन्
ते ह्येतार्था न संशयः ॥ ध्यानं तु द्विविधं प्रोक्तं सगुणं निर्गुणं केवलं स्मृतं ॥ आत्मज्ञानेन मुक्तिः स्यात्स च
योगाद् ऋते न हि ॥ स च योगश्चिरं कालमभ्यासादेव सिध्यति ॥ नारण्यसंश्रयाद्योगेन नानाग्रंथविच्छेद
नात् ॥ न दानेन व्रतेनापि न तपोभिर्न वा मखैः ॥ न च पद्मासनाद्योगो न च नासाग्रवीक्षणात् ॥ न शौ
चेन न मौनेन न मंत्राराधनेन वा ॥ अभियोगात्सदाभ्यासात्तत्रैव च विनिश्चयात् ॥ पुनः पुनरनिर्वेदा
त्सिध्येद्योगो न चान्यथा ॥ षष्टिं कुलान्यतीतानि षष्टिमागामिकानि च ॥ कुलान्युद्धरते शास्त्रसन्य
स्तमिति यावदेत् ॥ अथ केवलेन ज्ञानेनेति ॥ यदि केवलेन ज्ञानेन मुक्तिः तर्हि याज्ञवल्क्यस्य तत्क
तु प्रभृतीनां ॥ ज्ञानिनामपि मे संन्यासग्रहणानुपपत्तिः स्यात् ॥ इष्यते तस्मात् संन्यासज्ञानात् मुक्ति
तु स्यत तः आह ॥ अत्रिः ॥ नैवतावत् मुच्यते दुःखात् जन्मसंसारबंधनात् ॥ यावन्न धारयेच्छि
खो वैष्णवं लिंगधारणं ॥ प्रत्यध्वांतसमुच्छेदाज्ज्ञानमेकात्म्यनिष्ठतां ॥ संन्यासे साधनं प्रोक्तममम्
ते त्वेकसाधने ॥ तत्त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणां ॥ श्रुत्याभिविधीयते तस्मात् ततत्सा

५ गीपतितो भवेत् ॥ शिखासूत्रपरित्यागी वेदांतश्रवणं विना ॥ विद्यमानेपि सन्न्यासे पतेसेवनसंशयः ॥
दग्धाखिलाधिकारं श्चेत्तु भृत्यक्तानाग्निना मुनिः ॥ वर्त्तमानश्चेते मूर्द्धिन नेवस्याद्विधिकिंकरः
॥ दैताभावाहि दुःखाय सुखायाद्वैतभावना ॥ भारायाऽलं ष्टयं भूतं भूलकमन्नं सुखावहं ॥ तेनाधि
तेश्चलं ते नष्टं सर्वमनुष्ठितं ॥ येनाशाप्रश्लेः कृत्वा वैराग्यमवलंबितं ॥ क्षीरान्नसर्पिर्यथा ध्रुत्य
क्षितं तस्मिन्न पूर्ववत् ॥ बुध्यादेर्यत्सत्यं यत्सत्तान्तु पूर्ववत् ॥ बुध्यादेर्हीसलथा सतोऽन्नं दही
पूर्ववद्भवेत् ॥ चतुर्विधा भिक्षुकस्तु कुटीचरबहूदकौ ॥ हंसः परमहंसश्च योगः पश्चात्तउ
त्तमः ॥ असन्मानात्तपोवृद्धिः सन्मानात्तपसः क्षयः ॥ अर्चितः पूजितो विप्रो दुग्धा गौरिव गच्छ
ति ॥ मानापमानौ द्वावेतौ मत्युद्वेगकरौ नृणां ॥ तावेव विपरीतार्थौ योगिनः सिद्धिकारकौ ॥
न सुखं देवराजस्य न सुखं चक्रवर्तिनः ॥ दृशं वीतरागस्य मुनेरेकान्तवासिनः ॥ रथ्यायां बहुवे
स्त्राणि भिक्षा सर्वत्र लभ्यते ॥ भूमिशय्या सुविस्तीर्णा यतयः केन दुःखिताः ॥ नासमानसेहा
यषु निवसन्ती लेषु तपस्विषु ॥ जीवाऽलभ्यत्याविहितः ॥ ब्रह्मचर्यं समाप्य गृही भवेत् ॥ गृही भूत्वा
वनी भवेत् ॥ वनी भूत्वा प्रव्रजेदिति ॥ अन्यथा व्रतिका विकलोऽपि यदि वा ॥ तस्या ब्रह्मचर्यादेव प्रव्रजे ५

दिति॥ ब्रह्मचारिविकलोपि यदि वेतरथा व्रतान्यादृशः॥ अथवास्थितविकलोपि गृहाद्वा वनाद्वेति
आरुण्युपनिषदि॥ वा गृहस्थो वा ब्रह्मचारी वा नष्टो वा लौकिकाग्नीनुदराग्नौ समारोपयेदिति॥
उत्पन्ने ज्ञाने विरक्तो वैराग्ये परमे गतः॥ प्रव्रजेद्ब्रह्मचर्यान्तु यदि स्यात्स्वरमागतिः॥ व्यासः॥ ब्रह्मचा
री गृहस्थो वा वानप्रस्थोथवा पुनः॥ विरक्तः सर्वकामेभ्यः पारिव्राज्यं समाश्रयेत्॥ जाबालिः॥ संन्यास
निश्चयं कृत्वा पुनर्नैव करोति यः॥ स कुर्यात्कृच्छ्रमात्रं तु षण्मासात्प्रत्यनन्तरं॥ पराशरः॥ पारिव्रा
ज्यं तु वैराग्यात्कर्त्तव्यं विधुरादिभिः॥ विधिनानेन कुर्वीत संन्यासमिह बुद्धिमान्॥ बृहस्पतिः॥
संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया॥ प्रव्रजंत्यकृतोद्वाहाः परं वैराग्यमाश्रिताः॥ अत्रिः॥
न तावच्च धारयेद्विप्रो वैष्णवं लिंगमादरात्॥ अनाश्रमिणामपि जाबालश्रुत्या संन्यासो विहितः॥
अथ पुनरव्रती वा व्रती वा स्नातको वा उत्सन्नाग्निको वा अग्निको वा॥ श्रुतिः॥ यदहरेव विरजेत्त
दहरेव प्रव्रजेत्॥ तथा यदि आतुरस्यां मनसा वा वाचा वा संन्यसेत्॥ धारयेद्वैणवं दंडं न स्थूलं न कृश
न्तथो॥ तस्य चाग्रे च मूले च गोश्रिंगस्य मात्तु धारयेत्॥ द्विचत्वारि षडष्टौ वा त्र्यंगुलानि समाहितः॥
न न्यूनं नातिरिक्तं च द्विगुणं मूलतो ग्रतः॥ न दंडं विना गच्छेद्भिक्षुः पञ्चरयं बुधः॥ जलान्तरादि पुस्तिमेन

९ कश्चिद्दोषमाप्नुवेन्नृशिष्यादिभिर्विनितेपि नीत एव समात्मना ॥ हस्तपादादिवच्छिष्य इति शिष्या वदं
६ ति ॥ अंधः पंगुर्दरिद्रो वा विरक्तः संन्यसेद्द्विजः ॥ सर्वेषामेव वैराग्यं संन्यासे तु विधीयते ॥ तेन री
यते ॥ अथ परिव्राट् विवर्णवासा मुंडोऽपरिग्रहः ॥ शुचीरद्रोही भैक्षमाणो ब्रह्मभूयाय कल्पते ॥ आ
बालश्रुतिः ॥ शतं कुलानां पुरतो बभूव तथा पराणां त्रिशतं समग्रं ॥ ते भवंति पस्तुकृतस्य लोके येषां कु
ले संन्यस्यतीह विप्रः ॥ संन्यासाद्ब्रह्मणः स्थानं वैराग्यात्प्रकृतौ लयः ॥ ज्ञानात्कैवल्यमाप्नोतीति तिस्रो स्वा
गतयः स्मृताः ॥ अथानधिकारी ॥ आरूढपतितापत्यं कुनखी श्यामदंतकः ॥ क्षयी क्षीणांगविकलो न तु संन्या
समर्हति ॥ संप्रत्य वासितानां च संन्यासं नैव कारयेत् ॥ व्रतयज्ञतपोदानहोमस्वाध्यायवर्जितं ॥ सत्यशौचाभ्र
मन्त्रं संन्यासं नैव कारयेत् ॥ [illegible] याज्ञवल्क्यः ॥ एकभूक्तेन नक्तेन तथै
वायाचितेन वा ॥ उपवासेन चैकेन पादकृच्छ्रः प्रकीर्तितः ॥ पराकउपवासः ॥ एकभूक्तेन नक्तेवा अया
चितउपवाइति ॥ त्रिराहं सा द्वादशदिनसाध्यः ॥ मासोपवासः ॥ अत्र च ग्राससंख्याया नियमः ॥ पराश
रेन दर्शितः ॥ सायं तु द्वादश ग्रासाः प्रातः पंचदश स्मृताः ॥ चतुर्विंशतिरायाच्याः परे निरशनं स्मृ ९
तमिति ॥ आपस्तंबेन त्वन्यथोक्तं ॥ सायं द्वाविंशतिर्ग्रासाः प्रातः षड्विंशतिः स्मृताः ॥ चतुर्विंशतिरया

ख्याः परं निरशनास्त्रयः ॥ कुर्कुटाण्डप्रमाणस्तु यथा वास्यं विशेत्सुखमिति ॥ अनयोश्च विकल्पयोः ॥ शक्त्या
पेक्षो विकल्पः ॥ तप्तकृच्छ्रमाह ॥ याज्ञवल्क्यः ॥ तप्तक्षीरघृताम्बूनामेकैकं प्रत्यहं पिबेत् ॥ एकरा
त्रोपवासश्च तप्तकृच्छ्र उदाहृतः ॥ मनुना तु द्वादशरात्रनिर्वर्त्यो विहितः ॥ तप्तकृच्छ्रं चरन्विप्रो
जलक्षीरघृतानिलान ॥ प्रतित्र्यहं पिबेदुष्णान्सकृत्स्नायी समाहित इति ॥ क्षीरादीपरिमाणं पराशा
रेणोक्तं द्रष्टव्यं ॥ अपां पिबेत्तु त्रिपलं द्विपलं तु पयः पिबेत् ॥ पलमेकं पिबेत्सर्पिस्त्रिरात्रं चोष्णमारुतमि
ति ॥ रागद्वेषाद्याहितजनाः सर्वे तपस्यन्ति हिताहितं ॥ रागं तस्मान्न कुर्वीत यदिच्छेदात्मनो हितं ॥ क्षमातीर्थं
तपस्तीर्थं तीर्थमिन्द्रियनिग्रहः ॥ सर्वभूतदयातीर्थं ध्यानतीर्थमनुत्तमं ॥ एतानि पंच तीर्थानि सत्यं ष
ष्ठमकीर्तितं ॥ देहे तिष्ठन्ति सर्वस्य तेषु स्नानं समाचरेत् ॥ १५ ॥ न तथा पुष्करे स्नात्वा गयायां कुरुजाङ्गले
॥ मुच्यते पुरुषः पापाद्यथा स्नात्वा क्षमादिषु ॥ १६ ॥ नियतेन्द्रियग्रामो यत्र यत्र वशी नरः ॥ तत्र तत्र
कुरुक्षेत्रं निमिषं पुष्कराणि च ॥ १७ ॥ इदं तीर्थमिदं नेति ये नरा भेददर्शिनः ॥ तेषां विधीयते तीर्थगमनं त
त्फलानि च ॥ १८ ॥ सर्वं ब्रह्मेति यो वेत्ति न तीर्थं तस्य किंचन ॥ आगस्त्यमनसुपुण्येषु ब्रह्मण्य य

७ सवर्तते ॥१९॥ स्नानं मनोमलत्यागो दानं चाभयदक्षिणा ॥ ज्ञानं तत्त्वौ दद्शारात्रनिरूद्याभिहितः ॥ तप
कृच्छ्रं चरेन्नविप्रो जलक्षीरघृतानिलानिलान् ॥ प्रतिश्यह पिबिट्ठु प्रहानुसहकृत्त्नोयात्सप्ताहित इति ॥ क्षी
राद्दीपरिमाणां पराशरेण केदृष्टव्यं ॥ अपां वितु त्रिपलं ह्निपलं तु पयः पिबेत् ॥ पलमेकं पिबेत्सर्पिस्त्रिरात्र
चोष्णमारुतइति ॥ रागान्धा हि जनाः सर्वे पश्यन्ति हिताहितं ॥ रागं तस्मान्न कुर्वीत यदिच्छेदात्मनो हितं ॥
क्षमा तीर्थं तपं तीर्थं मिंद्रियनिग्रहः ॥ सर्वभूतदयातीर्थं ध्यानतीर्थमनुत्तमं ॥ त थैसबोधो ध्यानं निर्विष
यं मनः ॥२०॥ मनसश्चेंद्रियाणां च ऐकाग्र्यं परमं तपः ॥ तज्ज्यायः सर्वधर्मेभ्यः स धर्मः परम उच्यते ॥२१॥ द
क्षः ॥ त्रिंशत्परान् त्रिंशदवरान् त्रिंशच्च परतः परान् ॥ सद्य संन्यासनादेव नरकात्त्रायते पितॄन् ॥ अपि रा
स्त्रसमायुक्तं सदाचारसमन्वितं साधुवृत्तं गृहस्थं धं न नमस्यं कचिद्यतिः ॥ अपकारिणि कोपश्चेत् ॥
कोपे कोपः कथं नु ते ॥ धर्मार्थकाममोक्षाणां प्रसह्य परिपंथिनि ॥ शोकं नाशयते प्रज्ञां शोकेनाशयते भू
तिः ॥ स्मृतिं च नाशयत् शोको नास्ति शोकसमो रिपुः ॥ रागान्धा हि जनाः सर्वे न पश्यन्ति हितं ॥ संन्यस्तमिति
यो ब्रूयात् प्राणैः कंठगतैरपि ॥ न तत्तत्क्रतुसहस्रेण फलं प्राप्नोति मानवः ॥ इत्यादिना सापि जीविष्यति चे
द्यथाधिकारं यथाविधि दंडादि गृहीत्वा स्वधर्मनिष्ठो भवेदिति ॥ त्रिदंडं वि कुंडिका चैव सत्रंवाथ कपालि ७
कां ॥ जंतुना वारणं वस्त्रं सर्वं भिक्षुः परित्यजेत् ॥ बौधायनः ॥ तस्य त्यागविधिः ॥ आरण्यगत्वा शिखा

मुंडः काषायवासाः ध्यानकर्मदृढेभूत्वा नामद्रोहीयज्ञोपवीतं वेदांस्त्रिदंडं कमंडलुपात्रं परित्यज्य विसृज्य
सर्वकर्माणि सर्वसहः सर्वसंगनिवृत्तो प्रसन्नमनाः सुखासीनो विश्वरूपमात्मानं चिंतयेदिति॥ अथ त्यागस्य
निरूपणं बृहदारण्यके॥ एवमेवेतिमात्मानं विदित्वा ब्राह्मणाः॥ पुत्रैषणायाश्च वित्तैषणायाश्च लोकैष
णायाश्च व्युत्थायेति॥ अत्रिः॥ स्वधर्मस्थानयतिनू दृष्ट्वान्देवांश्च प्रणमेद्यतिः॥ नान्यमाश्रमिणां कंचित् प्र
शस्तमपि तं नमेत्॥ अपि शास्त्रसमायुक्तं सदाचारसमन्वितं॥ साधुदृष्टं गृहस्थाद्यं न नमस्येत् केचिद्यतिः॥
अंगिराः॥ सूर्यो रव्योल यो यद्वन्मेरुसर्षपयोरिव॥ अंतरं हि महद्दृष्टं तथा भिक्षुगृहस्थयोः॥ अत्रिः॥ वे
दाभ्यासः ॐकारः प्रणवाभ्यास एव च॥ एक एव चरेन्नित्यं सिद्ध्यर्थमसहायवान्॥ परः परमहंसस्तु तु
र्याख्यं श्रुतिशासनात्॥ शांतो दांतो सर्वसमः प्रणवाभ्यासतत्परः॥ श्रवणादिरतः शुद्धो निदिध्यासन
तत्परः॥ ब्रह्मभावेन संपूर्णं ब्रह्मांडमखिलं स्थितः॥ आत्मतत्त्वस्य चात्मरतिः समलोष्टाश्मकांचनः॥ त
त्वेपदैकबोधश्च विष्णुरूपः स्वयं सदा॥ अरण्यनिष्ठस्य यतेंद्रियस्य सर्वेंद्रियप्रीतिनिवृत्तकस्य॥ अ
ध्यात्मचिंतागतमानसस्य ध्रुवा ह्यनावृत्तिरपेक्षकस्य॥ अत्रिः॥ कौपीनाच्छादनं वासः कंथा शीतनि
वारिणी॥ पादुके चापि गृह्णीयात् कुर्यान्नान्यस्य संग्रहं॥ यदि वा कुरुते रागात् अधिकस्य परिग्रहं
॥ नरकं रौरवं गत्वा तीर्यग्योनिषु जायते॥ कौपीनं युगलं कंथा दंड एकः परिग्रहः॥ यतेः परमहंसस्य

८
ना धिकं तु विधीयते ॥ यतिधर्मसमुच्चये ॥ सर्वयज्ञेषु यद्दानं सर्वतीर्थस्य यत्फलं ॥ सर्वदानफलं वापि त
न्न तुल्यमहिंसया ॥ सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात्सत्यमप्रियं प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः ॥ अस
त्यमपि वक्तव्यं गोब्राह्मणहिताय च ॥ सूत्रादपि हितं यत्स्यात्सत्यं तत्समुच्यते ॥ श्रद्धा ध्यानं तपः शौचं वित्तं
यस्य चतुष्टयं ॥ भ्रमणं चाद्वितीयस्य तं देवा ब्राह्मणं विदुः ॥ न जातिः कारणं नात्र गुणाः कल्याणका
रणं ॥ वृत्तस्थमपि चाण्डालं तं देवा ब्राह्मणं विदुः ॥ अत्रिः ॥ विशीर्णान्यमलान्येव चैलानि ग्रंथयिता
नितु ॥ केलाकेंथा वहिर्वासो धारयेत धातुरंजितं ॥ ज्ञानेन मुच्यते भिक्षुस्तपसा स्वर्गमाप्नुयात् ॥ न
रकं विषयासंगान् त्रयो मार्गाः पंसस्विनां यतिपादोदकं राजन् हंति पापं पुराकृतं ॥ सत्यजन्मार्जितं सद्यः श्र
ह्याशिरसा धृत्वं ॥ ततः आचम्य विधिवत् प्राणायामान् षडाचरेत् ॥ अज्ञानकृतहिंसादिप्रसवायनि
हृल्लये ॥ अथोर्ध्वपुंड्रमोंकारेण कुर्यात्स्नानत्रये यतिः ॥ प्रथमं धारयेन्मूर्ध्नि प्रणवस्याद्यमात्रया ॥ द्वि
तियया ललाटे तु हृदये च तृतीयया ॥ प्राणायामत्रयं कृत्वा ऋष्यादिन्यासपूर्वकं ॥ उकारो देवमावेआच
मनानुकल्पः ॥ बृहस्पतिः ॥ पितृमातृश्वागुरोर्द्रोहे अत्यलं मे धर्मे क्षणे ॥ अधोवायुसमुत्सर्गे आक्रो
धसन्न वे ॥ मार्जारमूषकस्पर्शे प्रहासेऽनृतभाषणे निमित्तेषु च सर्वेषु दक्षिणं श्रवणं स्पृशेत् ॥ अर्द्धतृणं
गोमयं वा भूमिं वा संस्पृशेद्द्विजः ॥ क्षुते निष्ठीवने चैव दंतोच्छिष्टे तथानृते ॥ पतितानां च संभाषणे दक्षिणं श्र ८

वर्णं स्पृशेत्॥ यति प्राणायामः॥ अष्टमात्रो रेचकः षोडशमात्रः पूरको द्वात्रिंशन्मात्रः कुंभक इति त्रिशुप्राणा
णायामः॥ द्वादशमात्रो रेचकः चतुर्विंशन्मात्रः पूरकः अष्टाचत्वारिंशन्मात्रः कुंभक इति मध्यमः॥ षो
डशमात्रो रेचकः द्वात्रिंशन्मात्रः पूरकः चतुःषष्टिमात्रः कुंभकः इति प्राणायामः॥ ॥ ब्यासः॥ त्रिकालेम
ककालं वा पूजयेत्पुरुषोत्तमं॥ अन्येरानीतकुसुमैरर्चयेज्जगदीश्वरं॥ ७५॥ भूद्रामीलेजक्रयः॥ क्रीतैः ना
र्चयेद्बुद्धिमान्यतिः॥ १ कं च तुलसीपत्रं पुष्पं पर्युषितं त्यजेत्॥ ७६॥ अनीयतस्वयत्नेन पूजयेत्पुरुषो
त्तमं॥ मावपुष्पं भजेद्योगी बाह्यैर्वीभ्रद्द्यो शिवं॥ तदर्थं पुष्पहिंसायां न भवेद्दिंसकः क्वचित्॥ ७७॥ वि
ष्णोः पादोदकं तुष्टं नैवेद्यस्य च भक्षणे॥ निर्माल्यं शिरसा धार्यं महापातकनाशनं॥ ७८॥ यदि वाप्यमलोपः
स्याज्जपादिषु कर्मसु च न॥ व्याहारे हृष्णवं मंत्रं स्मरेद्वा विष्णुमव्ययं॥ ८०॥ कृष्णालयसमिपस्था न कृष्णा
दर्शनलालसा॥ चांडालानूपतितानुग्रात्यान् स्पृष्ट्वा स्नानमाचरेत्॥ ८१॥ पाद्मे॥ यः पूजयेद्धरिं चक्रे शा
लग्रामसमुद्भवे॥ राजसूयसहस्रेण तेनेष्टं प्रतिवासरं॥ ८२॥ महत्काष्ठस्थितो वह्निर्मथितस्थाने प्रकाशते॥
यथा तथा हरिर्व्यापी शालग्रामे प्रकाशते॥ ८३॥ विना तीर्थैर्विना दानैर्विना यज्ञैर्विना मखैः॥ मुक्तिं यांति नरा व
स्यं शालग्रामशिलार्चनात्॥ ८४॥ शालग्रामसमीपे तु क्रोशमात्रं समंततः॥ कैकटेपि मृतो वा पि वैकुं

९ टंसुवनं नरः ॥८५॥ कपिलः ॥ प्रातःस्नाने त्वशक्तश्चेत् कपिलं स्नानमाचरेत् ॥ तत्राप्यसामर्थ्यो यूकेमंत्रस्ना
9 नं समाचरेत् ॥८६॥ नाभेरुध्वं प्रविश्याप्सु कटिप्रक्षालनं मृज्जलैः ॥ जलार्द्रकर्पटेनांगशोधनं कापिल
स्मृतं ॥८७॥ सायंप्रातरशक्तः सामर्थ्ये स्नायेमवा पुनः ॥ परिवर्से च कौपीनं मंत्रस्नानं विधीयते ॥८८॥
पराशरः ॥ चक्षुरोगी शिरोरोगी कंठरोगी कफाधिकः ॥ कंठस्नानं प्रकुर्वीत शिरःस्नानफलं लभेत् ॥८९॥ काल
दोशादिसामर्थ्यान्न शक्नोति यदा त्वसौ ॥ ऋषिभिस्तु तदा प्रोक्ता मंत्रैर्दिहं तु माजनं ॥९०॥ आग्नेयं भस्मनास्नानं
अवगाह्यं च वारुणं ॥ आपोहिष्ठेति ब्राह्म्यं च वायव्यं रजसा गवां ॥९१॥ यत्तु सातपवर्षेहि तत्स्नानं दिव्यमु
च्यते ॥ स्नानान्येतानि चापत्सु व्याधितस्योदकं विना ॥ तैलाभ्यंगेन दुष्यन्न व्रणीनां ज्वातरोगिणां ॥९२॥ विश्वे
शोजकोउमा च जननी गंगा च मातृष्वसा ॥ धुंडिर्मेरुवदंडपाणिसहशा ज्येष्ठा मम भ्रातरः ॥ श्रीकाशिमणिक
र्णिका च भगिनि भार्या ममेयंमतिः ॥ सत्कर्मी सुतास्तदेवखिलं त्काश्यां कुर्वं मम ॥ त्वंपदार्थविवेकाय संन्यासः स
र्वकर्मणां ॥ श्रुत्याविधीयते यस्मात्तत्यागी पतितो भवेत् ॥१॥ नित्यकर्मपरित्यज्य वेदांतश्रवणं विना ॥ वर्त्तमानस्तु
संन्यासी पतत्येव न संशयः ॥२॥ अत्रिः ॥ आनंद्यं वै व्रजेद्देहं निंद्यं गेहं तु वर्जयेत् ॥ अनाहूते विशेद्वारि
गेहे नैवावृते व्रजेत् ॥ न विशेत् द्वाररंध्रेण भिक्षालिप्सुः कचिद्यतिः ॥ न कुर्याद्वै क्वचित् घोषं न द्वारं ताडये
त् क्वचित् ॥ तथा चोक्तं प्राणहत्यैव संतुष्टा मुनि नैवेंद्रियप्रियः ॥ शौनकः ॥ पीडयित्वा तु चात्मानं मत्यान्नं संप्रय ९

छति॥ सा भिक्षा हिंशिका ज्ञेया नादृशीं वर्जयेद्यतिः॥ पंचाहं सप्तरात्रं वा यत्र भिक्षा न लभ्यते॥ तद्गृहं वर्जयेद्भिक्षु
श्चांडालगृहवत्सदा॥ अत्रिः॥ गोदोहमन्नपाकं वा सकृत्प्रेक्षणमेव वा॥ एककालप्रतिक्षेत दृशीनाद्यतिः॥
संभ्रमं च न चेक्षलज्जितो दानार्थमुत्तमं॥ न कुप्येन्न न कंपेत न न्दृष्येन्नैव न कुत्सयेत्॥ अतिक्रम्य गृहं लोभान्न
पुनस्तद्गृहं व्रजेत्॥ [illegible]मेवेत्सर्वे संन्यासी तुल्यो वै धर्मतो यदि॥ तस्य प्राणामः कर्तव्यो नेतरायक दाचन॥१॥ अ
प्येकपंक्त्या नाश्नीयात्तु सुसंतः स्वजनैरपि॥ को हि जानाति किं कस्य प्रच्छन्नं पातकं भवेत्॥१॥ भस्मस्तेन जलद्वारमा
र्गैः पंक्तिं च भेदयेत्॥ इद अन्यग्रंथे॥ ५॥ सौरपुराणे॥ यदा मनसि वैराग्यं जायते सर्ववस्तुषु॥ तदैव संन्यसेद्वि
द्वान् अन्यथा पतितो भवेत्॥१॥ मनुः॥ देवपूजां तथा शौचं भोजनेषु समाचरन्॥ यतिर्मृण्मयपात्रेण न दोषो म
नुरब्रवीत्॥१॥ गृहस्थपाकभेदेन पात्रभेदेन मस्करि॥ नारीपुरुषभेदेन रौरवं नरकं व्रजेत्॥१॥ दंतास्वेतानरव
स्वेता स्वेता च अश्मसुद्रिका॥ कटिपुष्पदेववस्त्रं पंच स्वेता प्रकीर्तिता॥१॥ माहात्वा वयं समुच्चार्य मस्करी गृह
स्तो पतितो भवेत्॥ माहात्वा व्ययमनुच्चार्य मस्करिक पतितो भवेत्॥१॥ एते च संतानया दोषा ये पि स्युः कर्मसं
भवाः॥ संन्यासात्तद्दहद्दोषा तुषाग्नौ रिव कांचनं॥१॥ श्वकाकगर्दभैरूष्ट्रैर्जंबुकैर्वा नरैस्तथा॥ चांडालपतितैः
स्पृष्टैर्यतिपात्रं विसर्जयेत्॥१॥ मनुः॥ देवपूजां तथा शौचं भोजनेषु समाचरन्॥ यतिर्मृण्मयपात्रेण न दो

१० षो मनुरब्रवित्॥२१॥ गृहस्तपाकभेदेन पात्रभेदेन मस्करिनां रिपुरूपभेदेन रौरवं नरकं व्रजेत्॥२२॥ दंतास्ये
नानखस्वेनास्वेनाच ग्रस्म मुद्रिका॥ कटिपुष्पदेववस्त्रं पंच स्वेनाप्रकीर्तिता॥१॥ माहावाक्यसमुच्चा
यी गृहस्तो पतितो भवेत्॥ माहावाक्यमनुच्चार्यो गृहस्तो पतितो भवेत्॥ अत्रिः॥ विशिणीन्यमलाने
वचैलो निग्रंथितानि तु॥ कृत्वा कंथा बहिर्वासो धारयेत् धातुरंजितं॥१॥ ज्ञानेन मुच्यते भिक्षुस्तपसा स्वर्गमा
प्नुयात्॥ नरकं विषयासंगान् त्रयो मार्गाः तपस्विनां॥१॥ पादशोषं पीनशोषं शौचशोषं तथैव च॥ मध्येतु त्यं
तु तत्तोयं पर्युषीकरणं विना॥१॥ वसिष्टः॥ विना दंडेन पात्रं तु न गच्छेद्यतिसत्तमः॥ भिक्षाकाले दंडमेकं नोदपा
त्रं तु न गच्छेद्यतिसत्तमः॥ भिक्षाकाले दंडमेकं तु नोदपात्रं कदाचन॥१॥ इदं ग्रथवि श्वेश्वरि॥ पात्रं॥१२॥१३॥
अग्निगवा होत्रं गवालंबं सन्यासं पलपैत्रकं॥ देवारात्सुतोत्पत्तिकलौ पंच विवर्जयेत्॥१॥ यावन्वर्णविभागोस्य
स्तियावन्वेदाः प्रवर्तते॥ संन्यासं चाग्निहोत्रं च तावत्कुर्यात्कलौ युगे॥१॥ लब्धमर्थेन गृण्हीयात्लब्धं मंज
लिकर्मणा॥ मूर्खछंदानुवर्तेन यथार्थपंडितं बुधः॥१॥ स्नानं शौचं तथा भैक्षं नित्यमेकांतसीलता॥ भिक्षो
श्चत्वारि कर्माणि पंचमं न विधीयते॥१॥ स्नानेन मनोमलत्यागः शौचमींद्रियनिग्रहं॥ ब्रंह्मामृतं पिवेद्भैक्षं ए
कांतं द्वैतवर्जीतं॥२॥ स्नानं मनोमलत्यागो दानं चाभयदक्षिणा॥ ज्ञानं तत्वार्थसंबोधो ध्यानं निर्विषयं म १०

नः॥२॥ विज्ञानं तिमहावाक्यं गुरुश्चरणसेवया तैवै संन्यासिनां प्रोक्ताइ तरेनामधारकः॥ अत्याहारतथायाासः प्रजल्पो नियमाग्रहः॥ लोकसंगचदैन्यं च मस्कारि षडु विवर्जयेत्॥१॥ वासुदेवद्वयं रूपं चलं वाचलमेव वा॥ चलं संन्यासिरूपं च द्वं च लं स्थावरादिकं॥१॥ ब्रह्माद्दिदेवताः सर्वे यतेर्मान्यं करिष्यति॥ सर्वेषामाश्रमाणां च श्रेष्ठो मोक्षपरायणः॥१॥ अविद्यो वा सुविद्यो वा मूर्खं पंडित एव वा॥ वेषमात्रेण संन्यासि पूज्यः सर्वेश्वरो यथा॥१॥ संगृहि चेद्दृष्टः स्त्रीन पापमामरणात्तिकं॥ निर्दहिष्यति तत्सर्वमेकरात्रिस्थितो यतिः॥१॥ यतिदर्शनमात्रेण कोटितीर्थफलं लभेत्॥ वंदनं संभाषणं च तस्य पुण्यं न गण्यते॥१॥ स्कंदपुराणे॥ ब्रह्माविष्णुश्चरुद्रश्च साध्यस मरुतस्तथा सहस्रदुतो नयति दशावर्षाणि पंच च॥ जन्मकोटिसहस्रेषु पुजितेन शंकरः॥ यस्य गेहे यस्य समायाति माहां भागवतो यतिः॥ यतिभिः पूज्यमानस्तु सर्वे पमानिताः॥ सदोषनिर्गुणं वापि यतिपुत्र नकिर्त्तयेत्॥४॥ हरिर्ब्रह्मादयो देवा पि यतिपुत्रन किर्त्तयेत्॥४॥ हरिर्ब्रह्मादयो देवा पितरो नामुनयस्तथा॥ आगच्छंति सुरास्सर्वे द्रष्टुं शयामुनिपुंगवा॥५॥ तीर्थानि कृत्नतु सर्वे भिक्षुके गृहमागते॥ यतिर्यस्य गृहस्थस्य संतुष्टा वसंत गृहे॥६॥ तुष्टा भवंति दैत्यारिर्याव द्दा सुतसंप्लवं॥ येन मंत्रियति दुराद्दृष्ट्वा काषायवाससं॥७॥ राजसुयफलावाप्तिस्तेषां भवति पुत्रक॥ यतिरूपेन सर्वत्र विष्णुः पर्यटते मही॥८॥ भक्तानामनुकंपाय महंद्रे सविवर्धये॥ यदा

११ कारयति स्नानयति नांयो द्विजोत्तमा ॥९॥ स्नानेन लभते पुण्यं गंगायां षष्ठवार्षिकं ॥ कोपिनअच्छादनं दंडं वहिर्वा
सश्च पादुके ॥१०॥ अंनं तु कर्म शौचं च जपयज्ञास्त्र श्रेय च ॥ वेदाध्ययन तीर्थानि यावत्तत्वं न विंदति ॥१॥
तावद्भ्रमति संसारे यावदात्म्यं न विंदति ॥ विदिते तु परे तत्वे एकमेवानुपश्यति ॥२॥ पठित्वा चतुरो वेदान्धर्म
शास्त्राण्यनेकशः ॥ नाहं ब्रह्मेति यो विद्याद्दर्वीपाकरसं यथा ॥३॥ चतुर्वेदस्तु यो विप्रो सोमयाज्ञी शतं
क्रतु ॥ तस्माद्दृपिसति श्रेष्ठो मेरुसर्षपयोरिव ॥४॥ यथा खरश्चंदनभारवाही भारं च वेत्ता न तु चंदनस्य
॥ एवं हि शास्त्राणि बहुन्यधीत्य ज्ञानेन हीनः खरवद्वहंति ॥५॥ पादिं ओजकोपनिषत् ॥ ज्ञाति चर दृष चंडा
लवाटिकामिव ॥ राजंधानि कुंभपाकं वा गंधलेपन अपुद्धलेपनमिवा ॥ अज्यरुधीरमेव वा ॥ प्रदो
ष प्रयुक्त पादग्रहण नमस्कार पादधारणा ॥ उदित नमस्कारार्थ अभ्युअनुज्ञा ॥११॥ अभ्यागत प्रयुक्त ॥ अ
दर्शन प्रयुक्त ॥ अपुर्व प्रयुक्त ॥ परिवर्ज्य च कोपीनं मंत्रस्नानं विधीयते ॥८७॥ पराशरः ॥ चक्षुरोगी शिरोरो
गी कंठरोगी कफाधिकः ॥ कंठस्नानं प्रकुर्वित शिरस्नानं फलं लभेत् ॥८८॥ कालदोषादिसामर्थ्या
नशक्तोति यदाप्युसौ ॥ ऋषिभिस्तु तदा ज्ञात्वा मंत्रैर्दिष्टं तु मार्जनं ॥ वारुणं ॥ अपोशिष्ठेति ब्रात्म्यं च वा
यव्यं रजसा गवां ॥९०॥ यत्तु सातपवर्षेहितत्स्नानं दिव्यमुच्यते ॥ स्नानान्येतानि चापत्सु व्याधितस्यादकं ११

आग्नेयं भस्मनास्नानं अवगात्यं च २

विना॥॥१०॥ स्नानेप्यशक्तः स्नायीत नित्यमुष्णेन वारिणा॥ तैलाभ्यंगे न दुष्येत आणीनां ज्वातरोगिणां॥९॥ सूक्ष्म
त्वं स्वयंप्रकाशत्वेनापरोक्षत्वं मतममिमतं॥ अदृष्टादिवन्नित्यपरोक्षत्वं घटादिवद्दृश्यत्वं च व्यावर्त्तयि
तुं विशेषणद्वयमिति बोद्धव्यं॥ देहादिषु अपि आत्मशब्दप्रयोगदर्शनादत्रात्मशब्देन किं विवक्षितमित्या
कांक्षायामाह आहंकारादिति॥ अहंकार आदिर्यस्य अहंकारप्राणमन इंद्रियदेहसंघातस्य सोहंकारादिः॥
तथा देहांतीयस्य उक्तसंघातस्य सदेहांतः अहंकारादिश्चासौ देहांतश्चेति॥ तथा तस्मात्संगधिष्ठा
नतया साक्षितया च आंतर आत्मेति गीयते॥ अस्मिन्वाक्ये इत्यर्थः॥७॥ आत्मपदादिष्विव ब्रह्मशब्दस्य
प्रयोगदर्शनात्तद्व्यावर्त्तमानायात्र विवक्षितमर्थमाह॥ दृश्यमानस्येति॥ दृश्यमानस्य सर्वस्य जगतस्त
त्वमीर्यते॥ ब्रह्मशब्देन तद्ब्रह्म स्वप्रकाशात्मरूपकं॥८॥ इति तत्वविवेकः॥ दृश्यत्वेन मिथ्याभूतस्य सर्व
स्याकाशादेर्जगतस्तत्वमधिष्ठानतयाऽबाधावधित्वेन च पारमार्थिकं सच्चिदानंदलक्षणं यद्रूपमस्ति॥
तद्ब्रह्मशब्देनेर्यते कथ्यत इत्यर्थः॥ वाक्यार्थमाह तद्ब्रह्मेति॥ यदुक्तं लक्षणं ब्रह्म स्वप्रकाशात्मरूपं स्व
रूपं यस्य तत्स्वप्रकाशात्मरूपकं स एवेत्यर्थः॥८॥ मुनिवर्य किंकरेण रामकृष्णाख्य विदुषा विरचिता महा
वाक्यविवेकव्याख्या समाप्ता इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्परमहंसतीर्थविद्यारण्य॥९॥